शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

अभिज्ञान शाकुन्तलम् नाम नाटकस्य श्लोके सूक्तिभागस्य व्याख्या ।

'भवितव्यानां द्वाराणि भवन्ति सर्वत्र'।

श्लोकांशोऽयं कविता विद्यासेन महाकविना कालिदासेन विरचितस्य अभिज्ञान शाकुन्तलम् नाम नाटकस्य प्रथमाङ्कात् गृहीतोऽस्ति ।

अत्र सशर-चाप हस्तो रथारूढो राजा दुष्यन्तो मृगमनुसरन् महर्षेः कण्वस्याश्रम समीपमागतः वैखानसेन प्रार्थितः सन् विनीत वेषेण यदा आतिथ्य ग्रहणाय आश्रमं प्रविशति तदा निमित्तं सूचयन् कथयति - इदमाश्रमपदं स्त्रीरहितमस्ति, मम च दक्षिणो बाहुः स्फुरति, बाहुस्फुरणस्य स्त्रीलाभ रूपं फलमत्र कुतः स्यादिति, पुनश्च पक्षान्तरं विचार्य कथयति - अवश्यं भाविनां कार्याणां सर्वत्र द्वाराणि भवन्तीति ।

भवितव्यानां = अवश्यं भाविनां कार्याणां सर्वत्र = सर्वस्मिन्नेवस्थाने उचितेऽनुचिते वा स्थाने द्वाराणि = कार्यसाधनोपायाः भवन्ति जायन्ते ।

एवञ्च यदि मम स्त्री-प्राप्तिः अवश्यंभाविनी स्यात्तदा कुतोऽपि कुत्रापि स्यादिति शान्ते आश्रमेऽपि नाऽसम्भाविनीति नाश्चर्यम् । इति

उपेन्द्र झा
9/10/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
पुरुसेना, बलियाँ

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पण: नवम परिच्छेद:

रीति नियतानां रचनादीनां व्यत्यय: कथं भवति!
अथवा
'क्वचित्तु 'वक्त्राद्यौचित्यादन्यथा रचनादय:' इति कारिकाया: व्याख्या।

यद्यपि रचना, वृत्ति:, वर्णाश्च गुणाधीना: तथापि वक्त्रौचित्यात्, वाच्यौचित्यात्, प्रबन्धौचित्याच्च क्वचित् अन्यथा भावो भवति रचनादीनाम्। तत्र वक्त्रौचित्याद् यथा —

मन्थायस्तार्णवाम्भ: प्लुतकुहरचलन्मन्दरध्वानधीर:
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्ड:।
कृष्णाक्रोधाग्रदूत: कुरुकुलनिधनोत्पातनिर्घातवात:
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्॥

अत्र वाच्यादौ प्रशम रूपे प्रबन्धे च वेणी संहारं नाटके रूपे दीर्घ-समासा, उद्धता रचना, अभिनय प्रतिकूलत्वेन; दीर्घ-समासेन अर्थ-प्रतीतौ विलम्बाच्च अनुचितैव. किन्तु वक्ताऽत्र क्रोधी भीमसेन:, अत: तस्य औद्धत्य द्योतनाय उद्धता रचना कृता।

वाच्यौचित्याद् यथा-

मूर्धव्याधूयमानध्वनदमरधुनीलोलकल्लोलजालो-
द्धूताम्भ: क्षोदमुद्यत्प्रसभमभिनभ: क्षिप्तनक्षत्रलक्षम्।
ऊर्ध्वन्यस्ताङ्घ्रिदण्डभ्रमिभररभसोद्यन्नभस्वत्प्रवेग-
भ्रान्तब्रह्माण्डखण्डं प्रवितरतु शिवं शाम्भवं ताण्डवं व:॥

अत्र वक्तृ प्रकृति: सूत्रधारो वक्ता, प्रबन्धश्च नाटक:। तत्र दीर्घ समासमयी उद्धता रचना नोचिता। किन्तु अत्र श्लोके संहारकस्य शम्भो: उद्धतं ताण्डवं वर्ण्यम्। अत: तादृशस्य उद्धतताण्डवस्य प्रतिपादनाय या उद्धता रचना कृता सोचितैव।

प्रबन्धौचित्याद् यथा नाटकादौ रौद्रेऽपि अभिनय प्रतिकूलत्वेन न दीर्घ समासाद्यौचित्यम्। आख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादय:, किन्तु विकटबन्धत्वमेव गद्ये प्राधान्यात् गद्ये च विकटबन्धस्यैवौचित्यात्। अपि च तत्र वक्ता कवि: भवति न तु राज्ञी, कोमला रचना च राज्ञीमुखादेव शोभते। कथायां रौद्रेऽपि नात्यन्तम् उद्धता: रचनादयो विधीयन्ते. यतो हि तत्र वक्ता क्रोधाविष्टो न भवति वर्णनीयस्य पूर्वं प्रतिपन्नत्वेनोद्देश्यत्वात्। एवम् अन्यदपि औचित्यादि अनुसर्तव्यम्।

उपेन्द्र झा
9/10/20
एसो० प्रो० साहित्य
रा० उच्च० महाविद्यालय
फुलवरिया, पूर्णिया

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

साहित्य दर्पणः षष्ठः परिच्छेदः

रसात्मक वाक्यस्य काव्यत्वाङ्गीकारे, वाक्यत्वे न दर्शन योग्यता, इति कथं काव्यस्य दृश्यत्व सिद्धिरिति विचार प्रदर्शनम्। अपि च काव्यस्य ध्वनिर्गुणीभूत व्यङ्ग्य दृश्य श्रव्यभेदैश्च चातुर्विध्यात् काव्यं चतुर्धा, इति कुतो नोक्तम्? इति विचार प्रदर्शनम्।

वाक्यं रसात्मकं काव्यमिति काव्य लक्षणम् तत्र वाक्यस्य काव्यत्वाङ्गीकारे, तस्य च वाक्यस्य दर्शन योग्यत्वात् कथं काव्यस्य दृश्यभेद सिद्धिरिति चेत्? न। वाक्यस्य पद समूहत्वेन पदस्य च विभक्ति विशिष्ट शब्द रूपत्वेन शब्दार्थयोश्चाभिन्नत्वात् वाक्यस्यापि शब्दात्मकत्वार्थात्मकत्व स्वीकारेण तत्र शब्दतात्पर्येण श्रव्य भेदस्य अर्थ तात्पर्येण च दृश्य भेदस्य सिद्धिः।

काव्यस्यैव चतुर्विधत्वस्य सत्त्वात्, कथमेकत्र द्वयोः ध्वनि गुणीभूत व्यङ्ग्ययोः, अपरत्र दृश्य श्रव्ययोश्च पृथक्-पृथक् निर्देश इति चेत्? श्रूयताम्- काव्यस्य रसात्मक वाक्यत्वात् रसस्य च चमत्कारसारत्वात्, चमत्कारस्य च कुत्रचिदुत्तमत्वं कुत्रचिन्मध्यमत्वं इति चमत्कार द्वैविध्येन काव्यस्य ध्वनिर्गुणीभूतव्यङ्ग्यं चेति भेद द्वयं पृथक्निर्दिष्टम्

अपरं च काव्यं वाक्यम्। वाक्यं च पद समूहः। पदं च शब्दरूपम्। 'घटः' इत्ययं शब्दः, घटः इत्ययमर्थः, इति शब्दार्थयोरभेद व्यवहार दर्शनेन शब्दस्य श्रव्यत्वम्, अर्थस्य च दृश्यत्वं सिध्यति। तत्र दृश्य काव्येन अभिनयादिना काव्यार्थ बोधः। श्रव्य काव्येन उपदेशादिनेति उभयोर्भेदः। अतोऽयं काव्य शरीर निर्धारिको भेद द्वयोः पृथक्-पृथक् परिगणनमिति दिक्।

उपेन्द्र झा
9/10/20
सहा० प्रो० साहित्य
रा० उ० सं० महावि०
सुन्दरनगर, मण्डी

Oct 9, 2020